# श्रीमद्भगवतगीता : व्यावहारिकी उपयोगिता वर्तमानपरिप्रेक्ष्ये

## (बृहत्तर–वैदिक–अध्ययन–परिषदा (वेव्स) समायोजिता परिचर्चा)

नवदेहली: वैश्विकस्तरे भारतीयज्ञानसम्पदायाः महत्त्वं प्रस्थापयितुं बृहत्तर–वैदिक–अध्ययन–परिषदा (वेव्स) वर्षेऽस्मिन् समायोजितायां परिचर्चाशृंखलायां प्रथमा वेदविषयिकी परिचर्चा सत्यवतीमहाविद्यालये जाता, द्वितीयाश्च अत्यन्तसमसामयिकी परिचर्चा मार्चमासस्य त्रयोविंशतितमे दिनांके श्रीमद्भगवतगीतायाः व्यावहारिकी उपयोगिता वर्तमानापेक्षाश्च इति विषयमाधृत्य दिल्ली विश्वविद्यालयस्य उत्तरीपरिसरे स्थिते गाँधीभवनस्य समागारे समायोजिता। कार्यक्रमस्यास्य संचालनं दिल्ली विश्वविद्यालयस्य संस्कृतविभागस्य एसोसिएट प्रोफेसर डॉ. रणजीत बेहेरामहोदयेन कृतम्। प्रो. भूदेवशर्मा, वेव्स (अमेरिका) अस्यायोजनस्य संस्थापकाध्यक्षः, अमरीकादेशस्य ओहायोविश्वविद्यालयस्य अध्यक्षपदमलंकृतवान्।




इंजीनियरिंगसंकायस्य प्रो शिवचतुर्वेदी कार्यक्रमस्य मुख्यवक्तारूपेण विराजितः। परिचर्चायाः मुख्यवक्तारः – सुप्रसिद्ध वेदविदुषी, दिल्ली विश्वविद्यालयस्य मैत्रेयीमहाविद्यालयस्य पूर्वाचार्या डॉ. शशितिवारीमहोदयाय, नेपालदेशतः समागतः संहिताशास्त्री उपाधिना सम्मानितः डॉ. अर्जुनप्रसादबस्तोला– महोदयः, दिल्लीविश्वविद्यालयस्य संस्कृतविभागस्य पूर्वाध्यक्षः गाँधीभवनस्य निदेशकश्च डॉ. रमेशभारद्वाज महोदयः, दिल्लीविश्व–विद्यालयस्य संस्कृतविभागस्यैव एसोसिएट प्रोफेसर डॉ. भारतेन्दुपांडेयमहोदयः, दिल्लीविश्वविद्यालयस्य लक्ष्मीबाई–महाविद्यालयस्य संस्कृतविभागस्य पूर्वाचार्या डॉ. धर्म शर्मा, डॉ. राजेन्द्रकुमारपांडे, लेखकः [illegible], गाजियाबाद, चावर्तन्त।

स्वागतपरम्परायां सर्वप्रथमं श्री …नन्दमहोदयेन वैदिक मंगलाचरणं कृतम्, गाँधीमहोदयस्य प्रतिमां प्रति पुष्पार्पणं कृतम् अतिथिभिः, तदनन्तरमतिथीनाञ्च स्वागतं डॉ.रणजीतबेहेरामहोदयेन पुष्पमालाभिः च अभिहितम्। विषयप्रवर्तनसत्रे डॉ.शशितिवारी महोदयया गीतायां वर्णितस्य धर्म शब्दस्य तात्त्विकव्याख्यापेक्षिता वर्तमानयुगे इति उद्घोषितम्। तदनन्तरं, सभायां मुख्यवक्तारूपेण विराजितेन प्रो. शिवचतुर्वेदी महोदयेन गीतायां वर्णितानां पारिभाषिकशब्दानां–विषादः, सङ्ग–असङ्ग–कुसङ्ग–सत्सङ्गरू, विद्या–अविद्या, इत्यादीनां वैज्ञानिकव्यावहारिकश्च चिन्तनं प्रस्तुतम्। वैज्ञानिकैः वेदगीताश्च अवश्यमेव ज्ञातव्ये इत्युद्घोषितम् महोदयेन। स्ववक्तव्ये महोदयः रोबर्ट ओपेनहोवेर, रोबर्ट मिस्ट, रिचर्ड अल्बर्ट, डॉ कॉर्नवॉलिस प्रभृतिषु वैज्ञानिकेषु गीतायाः प्रभावमपि रेखांकितवान्।

नेपालदेशतः समागतः संहिताशास्त्री डॉ अर्जुनप्रसाद– बस्तोलामहोदयः स्ववक्तव्ये वेद–उपनिषदित्यादिनां सारं गीता इतिकथितम्। कृष्णस्य योगेश्वररूपमेव उपासनीयं, दुष्कर्माणि त्यक्त्वा सुकर्माण्येव आचरणीयानि–इति। डॉ भारतेन्दुपांडेयः सर्वशास्त्रेषु गीता सर्वाधिकव्यावहारिक– काव्यात्मक– युद्धरसपरिपूर्ण–कर्मप्रधान– आचारशास्त्रमिति स्वीकृतम्। वर्तमानसमये कर्तव्याकर्तव्यविषये गीता सदैव सहायिका वर्तते। गीता एव महात्मागांधीमहोदयस्य प्रश्नानां समाधानं कृत्वा, तं विचारतः आचारस्य मार्गं उपदिष्टवती। डॉ. धर्माशर्मा महोदया गीतायाः ज्ञानं सार्वकालिक– सार्वभौमिक– सार्वजनिकश्च इति उद्घोषितवती। कर्म–भक्ति–ज्ञान–योगत्रयेन वर्तमानयुगस्य तापत्रयस्य शमनं सम्भवम्। तत्पश्चात्, डॉ. राजेन्द्रकुमारपांडे महोदयेन गीतायाः दृष्ट्या वर्तमान– राष्ट्र–समाज– राष्ट्रवाद–संकल्पनाः परिभाषिताः। कः देवः पूजनीयः, कथंच,

